# ऋद्र छमकम

ओं अग्ना’विष्णो सजोष’सेमाव’र्धंतु वां गिरः’ | द्युम्नैर्-वाजे’भिराग’तम् | वाज’श्च मे
प्रसवश्च’ मे प्रय’तिश्च मे प्रसि’तिश्च मे धीतिश्च’ मे
क्रतु’श्च मे स्वर’श्च मे श्लोक’श्च मे श्रावश्च’ मे श्रुति’श्च मे ज्योति’श्च मे सुव’श्च मे प्राणश्च’ मेउपानश्च’
मे व्यानश्च मेउसु’श्च मे चित्तं च’ म आधी’तं च मे वाक्च’ मे मन’श्च मे चक्षु’श्च मे श्रोत्रं’ च मे दक्ष’श्च मे बलं’
च म ओज’श्च मे सह’श्च म आयु’श्च मे जरा च’ म आत्मा च’ मे तनूश्च’ मे शर्म’ च मे वर्म’ च मेउंगा’नि
च मेउस्थानि’ च मे परूग्म्’षि च मे शरी’राणि च मे || 1 ||
जैष्ठ्यं’ च म आधि’पत्यं च मे मन्युश्च’ मे भाम’श्च मेउम’श्च मेउंभ’श्च मे जेमा च’ मे महिमा च’ मे वरिमा
च’ मे प्रथिमा च’ मे वर्ष्मा च’ मे द्राघुया च’ मे वृद्धं च’ मे वृद्धि’श्च मे सत्यं च’ मे श्रद्धा
च’ मे जग’च्च मे धनं’ च मे वश’श्च मे त्विषि’श्च मे क्रीडा च’ मे मोद’श्च मे जातं च’ मे जनिष्यमा’णं च
मे सूक्तं च’ मे सुकृतं च’ मे वित्तं च’ मे वेद्यं’ च मे भूतं च’ मे भविष्यच्च’ मे सुगं च’ मे सुपथं च
म ऋद्धं च म ऋद्धिश्च मे क्लुप्तं च’ मे क्लुप्ति’श्च मे मतिश्च’ मे सुमतिश्च’ मे || 2 ||
शं च’ मे मय’श्च मे प्रियं च’ मेउनुकामश्च’ मे काम’श्च मे सौमनसश्च’ मे भद्रं
च’ मे श्रेय’श्च मे वस्य’श्च मे यश’श्च मे भग’श्च मे द्रवि’णं च मे यंता च’ मे धर्ता च’ मे क्षेम’श्च मे धृति’श्च मे विश्वं’
च मे मह’श्च मे संविच्च’ मे ङ्ञात्रं’ च मे सूश्च’ मे प्रसूश्च’ मे सीरं’ च मे लयश्च’ म ऋतं च’ मेउमृतं’ च
मेउयक्ष्मं च मेउना’मयच्च मे जीवातु’श्च मे दीर्घायुत्वं च’ मेउनमित्रं च मेउभ’यं च मे सुगं च’ मे शय’नं च
मे सूषा च’ मे सुदिनं’ च मे || 3 ||
ऊर्क्च’ मे सूनृता’ च मे पय’श्च मे रस’श्च मे घृतं च’ मे मधु’ च मे सग्धि’श्च मे सपी’तिश्च
मे कृषिश्च’ मे वृष्टि’श्च मे जैत्रं’ च म औद्भि’द्यं च मे रयिश्च’ मे राय’श्च मे पुष्टं च मे पुष्टि’श्च मे विभु च’ मे प्रभु
च’ मे बहु च’ मे भूय’श्च मे पूर्णं च’ मे पूर्णत’रं च मेउक्षि’तिश्च मे कूय’वाश्च मेउन्नं’ च मेउक्षु’च्च
मे व्रीहय’श्च मे यवा”श्च मे माषा”श्च मे तिला”श्च मे मुद्गाश्च’ मे खल्वा”श्च मे गोधूमा”श्च मे मसुरा”श्च
मे प्रियंग’वश्च मेउण’वश्च मे श्यामाका”श्च मे नीवारा”श्च मे || 4 ||
अश्मा च’ मे मृत्ति’का च मे गिरय’श्च मे पर्व’ताश्च मे सिक’ताश्च मे वनस्-
पत’यश्च मे हिर’ण्यं च मेउय’श्च मे सीसं’ च मे त्रपु’श्च मे श्यामं च’ मे लोहं च’ मेउग्निश्च’ म आप’श्च
मे वीरुध’श्च म ओष’धयश्च मे कृष्णपच्यं च’ मेउकृष्णपच्यं च’ मे ग्राम्याश्च’ मे पशव’ आरण्याश्च’ यङ्ञेन’
कल्पंतां वित्तं च’ मे वित्ति’श्च मे भूतं च’ मे भूति’श्च मे वसु’ च मे वसतिश्च’ मे कर्म’
च मे शक्ति’श्च मेउर्थ’श्च म एम’श्च म इति’श्च मे गति’श्च मे || 5 ||
अग्निश्च’ म इंद्र’श्च मे सोम’श्च म इंद्र’श्च मे सविता च’ म इंद्र’श्च मे सर’स्वती च म इंद्र’श्च मे पूषा
च’ म इंद्र’श्च मे बृहस्पति’श्च म इंद्र’श्च मे मित्रश्च’ म इंद्र’श्च मे वरु’णश्च म इंद्र’श्च मे त्वष्टा’ च म इंद्र’श्च मे धाता
च’ म इंद्र’श्च मे विष्णु’श्च म इंद्र’श्च मेउश्विनौ’ च म इंद्र’श्च मे मरुत’श्च म इंद्र’श्च मे विश्वे’ च मे देवा इंद्र’श्च मे
पृथिवी च’ म इंद्र’श्च मेउंतरि’क्षं च म इंद्र’श्च मे द्यौश्च’ म इंद्र’श्च मे दिश’श्च म इंद्र’श्च मे मूर्धा च’ म इंद्र’श्च
मे प्रजाप’तिश्च म इंद्र’श्च मे || 6 ||
अंग्शुश्च’ मे रश्मिश्च मेउदा”भ्यश्च मेउधि’पतिश्च म उपांग्शुश्च’ मेउंतर्यामश्च’ म ऐंद्रवायवश्च’ मे मैत्रावरुणश्च’
म आश्विनश्च’ मे प्रतिप्रस्थान’श्च मे शुक्रश्च’ मे मंथी च’ म आग्रयणश्च’ मे वैश्वदेवश्च’ मे ध्रुवश्च’ मे वैश्वानरश्च’
म ऋतुग्रहाश्च’ मेउतिग्राह्या”श्च म ऐंद्राग्नश्च’ मे वैश्वदेवश्च’ मे मरुत्वतीया”श्च मे माहेंहेंहेंद्रश्च’ म आदित्यश्च’
मे सावित्रश्च’ मे सारस्वतश्च’ मे पौष्णश्च’ मे पात्नीवतश्च’ मे हारियोजनश्च’ मे || 7 ||
इध्मश्च’ मे बर्हिश्च’ मे वेदि’श्च मे दिष्णि’याश्च मे स्रुच’श्च मे चमसाश्च’ मे ग्रावा’णश्च मे स्वर’वश्च म उपरवाश्च’
मेउधिषव’णे च मे द्रोणकलशश्च’ मे वायव्या’नि च मे पूतभृच्च’ म आधवनीय’श्च म आग्नी”ध्रं च मे
हविर्धानं’ च मे गृहाश्च’ मे सद’श्च मे पुरोडाशा”श्च मे पचताश्च’ मेउवभृथश्च’ मे स्वगाकारश्च’ मे || 8 ||

अग्निश्च' मे घर्मश्च' मेउर्कश्च' मे सूर्य'श्च मे प्राणश्च' मेउश्वमेधश्च' मे
पृथिवी च मेउदि'तिश्च मे दिति'श्च मे द्यौश्च' मे शक्क'रीरंगुल'यो दिश'श्च मे यङ्'ञेन'
कल्पंल्पंल्पंतामृक्च' मे साम' च मे स्तोम'श्च मे यजु'श्च मे दीक्षा च' मे तप'श्च म ऋतुश्च' मे व्रतं च'
मेउहोरात्रयो''र्-दृष्ट्या बृ'हद्रथंतरे च मे यङ्'ञेन' कल्पेताम् || 9 ||

गर्भा''श्च मे वत्साश्च' मे त्र्यवि'श्च मे त्र्यवीच' मे दित्यवाट् च' मे दित्यौही च' मे पंचा'विश्च मे पंचावी च' मे त्रिवत्सश्च' मे त्रिवत्सा च' मे तुर्यवाट् च' मे तुर्यौही च' मे पष्ठवाट् च' मे पष्ठौही च' म उक्षा च' मे वशा च' म ऋषभश्च' मे वेहच्च' मेउनड्वां च मे धेनुश्च' म आयु'र्-यङ्'ञेन' कल्पतां प्राणो यङ्'ञेन' कल्पताम्-अपानो यङ्'ञेन' कल्पतां व्यानो यङ्'ञेन' कल्पतां चक्षु'र्-यङ्'ञेन' कल्पताग् श्रोत्रं' यङ्'ञेन' कल्पतां मनो' यङ्'ञेन' कल्पतां वाग्-यङ्'ञेन' कल्पताम्-आत्मा यङ्'ञेन' कल्पतां यङ्'ञो यङ्'ञेन' कल्पताम् || 10 ||

एका' च मे तिस्रश्च' मे पंच' च मे सप्त च' मे नव' च म एका'दश च मे त्रयोदश च मे पंच'दश च मे सप्तद'श च मे नव'दश च म एक'विंग्शतिश्च मे त्रयो'विंग्शतिश्च मे पंच'विंग्शतिश्च मे सप्त विग्म्'शतिश्च मे नव'विंग्शतिश्च म एक'त्रिंग्शच्च मे त्रय'स्त्रिंग्शच्च मे चत'स्-रश्च मेउष्टौ च' मे द्वाद'श च मे षोड'श च मे विंग्शतिश्च' मे चतु'र्विंग्शतिश्च मेउष्टाविग्म्'शतिश्च मे द्वात्रिग्म्'शच्च मे षट्-त्रिग्म्'शच्च मे चत्वारिंग्शच्च' मे चतु'श्-चत्वारिंग्शच्च मेउष्टाच'त्वारिंग्शच्च मे वाज'श्च प्रसवश्चा'पिजश्च क्रतु'श्च सुव'श्च मूर्धा च व्यश्नि'यश्-चांत्यायनश्-चांत्य'श्च भौवनश्च भुव'नश्-चाधि'पतिश्च || 11 ||

ओं इडा' देवहूर्-मनु'र्-यङ्ञनीर्-बृहस्पति'रुक्थामदानि' शग्ंसिषद्-विश्वे'-देवाः सू''क्तवाचः पृथि'विमातर्मा मा' हिंग्सीर्-मधु' मनिष्ये मधु' जनिष्ये मधु' वक्ष्यामि मधु' वदिष्यामि मधु'मतीं देवेभ्यो वाचमुद्यासंग्शुश्रूषेण्या''म् मनुष्ये''भ्यस्तं मा' देवा अ'वंतु शोभायै' पितरोउनु'मदंतु ||
ओं शांतिः शांतिः शांतिः' ||